M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref. / Ser. 36
Title: Nyaya Siddhanta Manjari Prakasha.

36

Siddhāntā

Title: Nyāya Manjari Prakāsh

Author: Rangāsvāmi Bhāskara

Editor:

Year, Vols.

Publisher

Remarks

36

न्यायमञ्जरीप्रकाशः

१ ज्योतिष्टोमव...

न्यायसिद्धांतमंजरीप्रकाशः

॥ श्रीगणेशाय नमः ॥ लक्ष्मीकांतं वासुदेवं प्रणम्य लौगाक्षीणामन्वये संप्रसूतः ॥ सोऽहं कुर्वे भास्करो लोकतंत्रे सि
द्धांतानां मंजरीसुप्रकाशं ॥१॥ चिकीर्षितग्रंथसमाप्तिप्रतिबंधकविघ्नविघाताय कृतं श्रीगणेशनमस्काररूपं
[illegible] मंगलं शिष्यशिक्षार्थमादौ निबध्नाति तत्परं परस्यास्य कीर्त्यनुवृत्त्यै स्वनामग्रंथनाम्नी च निब
ध्नाति श्रीगणेश्येत्यादि। ननु मंगलस्य समाप्तिफलकत्वे विघ्नविघातफलकत्वे वा [illegible] इति चेदुच्यते॥
मंगलं सफलं अविगीतशिष्टाचारविषयत्वादित्यनुमानेन सामान्यतस्तस्य सफलत्वं सिद्ध्यति। शिष्टाचा
रविषये चेत्सर्वं दर्शादौ व्यभिचारवारणाय विशिष्टेति। शिष्टत्वं च वेदप्रामाण्याभ्युपगमविरोधित्वं॥ वि
रोधी च सर्वोऽपि वेदः प्रमाणमिति ज्ञानं तादृशसंस्कारश्च॥ तेन निद्रादशायामपि शिष्टत्वं। न च शिष्टस्य बौद्ध
तादृशायामतिव्याप्तिं निद्रानीतादृशज्ञानसंस्कारयोरंशतः स्फुरणमात्। दृढतरविरोधिज्ञानस्यापि संस्का
रनाशकतायाः सर्वसिद्धत्वात्। विश्वामित्रकृतत्रिशंकुयाज्ययाजने व्यभिचारं वारयितुं अविगीतेति शिष्टाचा
रविषयविशेषणं। अविगीतत्वं॥ नास्त्यविगीतत्वं। अथ याज्ययाजनं तु शास्त्रविहितमेवेति न व्यभिचारः
॥ न चायाज्ययाजने नरकफलकत्वसत्त्वाद्व्यभिचार इत्यविगीतेति व्यर्थमिति वाच्यं तत्रेष्टफलकत्वस्यैव
प्र२ साध्यत्वात्। निचार्यो जनकत्वं। अविगीतशिष्टाचारविषयीभूतं मंगलं यदि सफलं न स्यात्तदा वेदमूलकं
न स्यादित्यनुकूलतर्कस्य सत्त्वात्॥ न चास्य वेदमूलकत्वे मानाभावः॥ मंगलं वेदमूलकं अलौकिक

शिष्टाचारविषयत्वात्॥ अग्निहोत्रवदित्यनुमानत्वात्॥ शिष्टकर्तृभोजनादौ व्यभिचारवारणायालौकिकेति
विषयविशेषणं। अलौकिकत्वं च लौकिकप्रमाणाबोधितकर्तव्यताकत्वं। भोजनस्य तु रागतः प्राप्ततया
निरुक्तालौकिकत्वस्याभावान्न व्यभिचारः॥ न च मंगलस्य मूलभूतो वेदः प्रत्यक्षबाधित इति वाच्यं। कर्मा
रंभे मंगलमाचरेदित्यर्थकस्य विच्छिन्नस्यैव वेदस्यानुमानात्॥ अन्यथा मंगलाचारस्याद्यपरंपरानु
प्रसंगात्॥ न च त्रिवेदी विंध्यादौ व्यासादीनां सत्त्वात्तद्वेदमुच्छेद इति वाच्यं॥ भरतखंडेऽध्ययनाभावस्य
[illegible] अत एव स्मृत्याचारयोर्वेदमूलकत्वेन प्रामाण्यं। ननु [illegible] वेदस्य प्रायश्छिन्न एवे
निषिद्धातः [illegible] मंगलस्य सफलत्वसिद्धावपि फलविशेषनिश्चयः सत्तरां प्रसक्तमनुपपत्तेर्वि
शेषतः फलजिज्ञासायां [illegible] कर्मसमाप्तिरेव फलत्वेन कल्प्यते॥ उपस्थितत्वादित्यदृष्टत्वात्तु स्वर्गादिः
अनुपस्थितत्वाद् दृष्टफलत्वापत्तेः संभवति दृष्टफलकत्वे अदृष्टकल्पनाया अन्याय्यत्वात्॥ अन्यथा भोजनादा
वप्यदृष्टकल्पनापत्तेः॥ समाप्तिश्च चरमकृतिध्वंसरूपं संपूर्णत्वं॥ आद्या प्रवृत्तिरारंभ इति जैमिनीयारंभ
लक्षणानुसारात्॥ चरमकृतिश्च सोत्र शेषत्वकृत्यनपेक्षा कृतिः॥ तेन प्रथमकृतिमात्रजनितसमा
प्तेनाव्याप्तिः॥ तत्र प्रथमकृतेरेव तादृशत्वेन चरमत्वकृतित्वात्॥ अस्मदादिकृतिसाध्यकर्मसमाप्तेरेव
दूदलक्षणं॥ नातईश्वरकृतिसाध्यब्रह्माण्डकादि समाप्तावव्याप्तिः॥ उत्पत्तिक्षणध्वंसः समाप्तिरिति तु

तत्साधारणं लक्षणं ॥ निरुक्तसमाप्तेः कर्मनिष्ठत्वेन प्रतियोगितयाऽन्यत्वेन संबंधेन ॥ स्वचरमक्षणवृत्ति
२ ध्वंसः ॥ तेन कर्मसमाप्तो धर्मिधर्मिभावः सूपपन्नः ॥ केचित्तु ग्रंथसमाप्तिश्चरमवर्णध्वंस इति विशि धते२
शिष्यलक्षणमाहुः ॥ नच सत्यपि मंगले कश्चित् समाप्तेरदर्शनात् सत्यपि तस्मिन् ग्रमत्त नास्तिकानुष्ठि
तकर्मणि समाप्तिदर्शनाच्च ॥ न तस्य तद्धेतुत्वमिति वाच्यं सत्यपि मंगले यत्र फलाभावस्तत्र कर्त्रादिवै
गुण्यात् ॥ तदुक्तं ॥ कर्मकर्तृसाधनवैगुण्यात् फलाभाव इति ॥ मंगलं नास्तिकानुष्ठितकर्मणि तु जन्मान्तरी
यमंगलकल्पनान्नदोष इति ॥ विघ्नध्वंसस्तु मंगलस्य द्वारमिति प्राञ्चः ॥ नव्यास्तु मंगलस्य न चिकीर्षि
ता तसमाप्तिः फलं किंतु विघ्नध्वंस एव ॥ आवश्यकत्वात् ॥ समाप्तिस्तु विघ्नसंसर्गाभावसहकृतस्वकारणकलापादेवेति न क्वापि व्यभिचारः ॥ नच यत्र मंगलं विनापि ग्रंथसमाप्तिस्तत्रादितो विघ्नध्वंसस्याव्य गद्द
सा व्यभिचार इति वाच्यं ॥ तस्यापि मंगलजत्वात् ॥ तदुक्तं विघ्नोत्सारणसाधारणकारणं मंगलमिति ॥ समाप्तिप्रतिबंधकदुरितनिवर्त्तनेन विघ्नस्योत्सारणं नाशस्तद्व्यसाधारणं कारणं नतिस्तुत्यादिरूपं मंगलमेव राम० २
३ तद्व्याप्तमित्यर्थः ॥ कारणादिवारणाय साधारणपदं ॥ कार्यादिस्तु कार्यत्वावच्छिन्नजन्यतानिरूपितकारण
ताश्रयत्वेन साधारणत्वमिति ॥ नच यतः सिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फलत्वापत्तिरिति वा
च्यं ॥ इष्टत्वात् ॥ वर्चैवं मंगलस्य विघ्नध्वंसं प्रति तृतीयांव्यभिचारः ॥ विघ्नस्य कारणांतराभावेन तत

त्तेन विघ्नध्वंसस्याजननात् ॥ विघ्नशंकयैव तदाचरणात् ॥ नच नाशकारणेनाशार्थिप्रवृत्तौ नाशस्य निश्चय
सहेतुत्वादिप्रसंदेहे कथं न तत्र कारणी भूत मंगले प्रवृत्तिरिति वाच्यं ॥ प्रायश्चित्तादिप्रवृत्तौ नाशस्य
निश्चयस्य हेतुत्वेऽपि प्रकृते तथाज्ञानमानस्यैव प्रवृत्तिहेतुत्वांगीकारपगमात् । तथैव शिष्टाचारादित्याहुः ॥ प्रा प्युऊ
शब्द४ प्यप्रकृष्टं नत्वा इति ॥ प्रकृष्टोत्कर्षः नमः स्कारेभक्तिश्रद्धातिशयत्वं केवलं तथाभूत नमस्कारस्यैव मं
गलत्वात् ॥ नमस्कारत्वं च ज्ञानत्वावांतरजातिविशेष ॥ सच नमस्कार्यस्यापकृष्टोत्कृष्टत्वप्रकारकनिश्चयः ॥ न
चैवं करशिरः संयोगे नमः पदादौ च नमस्कार व्यवहारो न स्यादिति वाच्यं ॥ तादृशज्ञानरूपनमस्कार
व्यंजकत्वेन तत्र तादृश व्यवहारस्य गौणत्वात् ॥ नहि कायिकादित्रितयसाधारणं नमस्कारत्वं जातिः ग्रं८
संभवति संयोगत्वादिना सांकर्यात् ॥ त्वामसेवेनचेश्वरनमस्कारस्य मंगलपरिभाषापेक्षयाव्यवहितपूर्वकाल णा
वेदर्शितः ॥ अव्यवहितपूर्वकालत्वस्य तदर्थत्वात् नेति न शिष्या अपि एवमेव कुर्युरिति शिष्याभिशिक्षा
उपदेशरूपा भवति ॥ परमेश्वरदर्शितत्वजगदाराध्यत्वादुत्कर्षचाप्तिः ॥ आत्मानमीश्वरमित्यर्थः ॥ जी
वात्मनस्ता दृक्परत्वाभावात् ॥ अत्रात्मत्वं चेतनत्वं न तु जातिः ॥ मानाभावात् ॥ नच सुखादि समवायि
कारणतावच्छेदकतया तत्त्वजातिसिद्धिः ॥ अनुत्पन्नानतिरिक्तवृत्तित्वेन जीवत्वेनात्मनेस्तत्र तदवच्छेदकत्वोचि २यं
त्वात् ॥ अन्यथात्मत्वस्य तदवच्छेदकत्वे ईश्वरेऽपि सुखादिकं स्यात् ॥ नित्यस्यस्वरूपयोग्यस्य फलावश्यं ग्य
खाद्यु

भावनियमात्॥ नचसहकार्यभावाज्ञातत्वाद्दर्शनिवाच्यं॥ तन्नियमबलेनैवबादिनानदात्मनिसहकारिसमव
धानस्यापिसुवचत्वात्॥ नचात्मपदशक्यतावच्छेदकतयात्मत्वजातिसिद्धिरितिवाच्यं॥ [illegible]
व्यात्मजातिसिद्धिरितिवाच्यं॥ पदशक्यतावच्छेदकतयाजातिसिद्धेरभावात्॥ अन्यथाहर्यादिपदेपिहरिपदश
क्यतावच्छेदकतयाविष्णुसिंहादिसाधारणजातिसिद्ध्यापत्तेः॥ तत्रेष्टापत्तौचहर्यादिपदेनानार्थत्वोच्छे
दापत्तेः॥ शक्यतावच्छेदकभेदसत्वएवनानार्थत्वसंभवात्॥ तस्मादात्मत्वंनत्वोपाधिरेवात्मत्वं॥ तदेवचात्म
पदप्रवृत्तिनिमित्तं॥ ननुजीवत्वं॥ ऋत्पादावीश्वरे आत्मपदप्रयोगानापत्तेः॥ इत्यविभाजकोपाधिरपितदेव
इतरथेश्वरस्यदृशामनत्वापत्तिरितिसंक्षेपः॥ जानकीनाथशर्मणेतिकर्तृकः॥ शर्मेतिनामनिर्देशोब्राह्म
णत्वसूचनाय॥ शर्मान्तंब्राह्मणस्येतिस्मरणात्॥ करिष्यतइतिप्रयोक्त्वोक्तिःयतइतिलट्प्रयोगोवर्तमा
नसामीप्यात्॥ युक्तिमुक्तावलिरिति॥ युक्तयःसाधकबाधकप्रमाणोपन्यासास्ताएवमुक्तास्ताभिरित्यर्थः॥ यु
क्तीनांमुक्तासाम्येनमनिरुष्टत्वंसूचितं॥ न्यायसिद्धांतमंजरीति॥ न्यायोगोतमप्रणीतसूत्रसंदर्भरूपाविद्या
तत्रयेसिद्धांताअर्थविशेषास्तेषांमंजरीपुष्पविशेषस्तन्नामकोग्रंथविशेषइत्यर्थः॥ ग्रंथेमंजरीसंज्ञानिर्दे
शेनप्रेक्षावदुपादेयत्वंसूचितमित्यर्थः॥ प्रेक्षावत्प्रवृत्तयेविषयाद्यनुबंधचतुष्टयंदर्शयितुंभूमिका
रचयतिइहेत्यादिना॥ नन्विष्टसाधनताज्ञानस्यैवप्रवृत्तिहेतुत्वात्किंविषयाद्यनुबंधचतुष्टयदर्शनेनेति

चेन्न॥ ग्रंथप्रवृत्तौविषयादिचतुष्टयज्ञानजन्येष्टसाधनताज्ञानस्यैवहेतुत्वमितितद्दर्शनात्॥ तदुक्तं॥ ज्ञातार्थंज्ञातसं
बंधंश्रोतुंश्रोताप्रवर्तते॥ शास्त्रादौतेनवक्तव्यःसंबंधःसप्रयोजनइति॥ ज्ञातार्थंज्ञातप्रयोजनं॥ एतेनाधिकार्यपि
संगृहीतः॥ ग्रंथप्रयोजनकामस्यैवतत्राधिकारित्वात्॥ ज्ञानसंबंधमित्यनेनविषयोपिसंगृहीतः ग्रंथविषययोः
प्रतिपाद्यप्रतिपादकभावस्यैवग्रंथादौसंबंधत्वात्॥ इह॥ प्रकृतग्रंथे॥ प्रमाणनिरूप्यतइत्यन्वयः॥ कि
लेति अनुप्रासरूपवाक्यालंकारार्थं॥ किलेति खिलेति लकारसाम्यात्॥ वर्णसाम्यमनुप्रासइतितल्लक्षणात्
॥ अतएवक्वचित्पुस्तकेखल्विनिपाठोनयुक्तः॥ प्रमाणनिरूपणेहेतुमाहनिखिलेत्यादिना॥ प्रमाणाधी
नमित्यंतेन॥ निखिललोकानांसंसारात्मनांकिमीक्ष्यः आत्यंतिकदुःखनिवृत्तिस्तस्यमुख्योपायस्साधार
णकारणमात्मनः जीवेश्वरभेदेनद्विविधस्यात्मनः॥ द्वेब्रह्मणीवेदितव्येपरंचापरमेवचेतिश्रुत्याद्विविधा
त्मतानस्यमोक्षहेतुत्वप्रतिपादनात्॥ तत्वज्ञानंदेहादिभिन्नत्वेनज्ञानं॥ आमनंति। वदंति विद्वद्विदइति
शेषः॥ तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायेतिश्रुतेरितिभावः॥ तंविदित्वैवमृत्युंसंसारमत्ये
तिअतरति अयनायमोक्षायनान्यःपंथाविद्यतेज्ञानभिन्नउपायोनास्तीतिश्रुत्यर्थः॥ ननुकेयमात्यंतिक
दुःखनिवृत्तिरितिचेदुच्यते॥ स्वसमानाधिकरणदुःखसमानकालीनदुःखध्वंसोमोक्षः॥ इदानीत
नदुःखध्वंसेतिव्याप्तिवारणायदुःखसमानकालीनेतिदुःखध्वंसविशेषणं॥ अ[illegible]दुःखस

मं.प्र. ४ — छ्दु — प्राथमिकदुःखविशेषणं स्वं लक्ष्यत्वेनाभिमतो

मानकालीनत्वार्थकामोक्षोत्पत्तिव्याप्तिवारणाय स्वसमानाधिकरणेति प्राथमिकदुःखध्वंस ॥ इत्थं च मु
(२३) क्तमोक्षस्यस्वसमानाधिकरणदुःखसमानकालीनत्वाभावव्याप्तिरितिभावः ॥ प्राथमिकदुःखध्वंसो स्वसमानाधिकरणचर (उत्पिस्य)
(स्वर) (२३) मदुःखासमानकालीनत्वेतिनतदुत्पत्तिव्याप्तिः ॥ नन्वात्मतत्त्वज्ञानतत्वमोक्षत्वावच्छिन्नहेतुः ॥ तत्वविनापि
काशीमरणादिनामोक्षोत्पादादितिचेन्न ॥ काशीमरणादिनातत्वज्ञानोदयानंतरमेवमोक्षस्यामुपपत्त (गमा)
त् ॥ ननु कंचिंतामणिकृता काशीमरणस्यतत्वज्ञानफलकत्वं चागमोदितिवेति ॥ तदा तत्वज्ञाने कृतोभवती
त्यत आह मननोपायमिति ॥ तत्वज्ञानविशेषणं ॥ मननमुपायः साधनं यस्य तत्तादृशमित्यर्थः ॥ इत्थं च श्रवण
(प्युप) देरप्युपलक्षकं ॥ श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरितिस्मरणात् ॥ श्रुतिवाक्यो त्थज्ञानं श्रवणं
(मननं तेन) तेनासंभावनानिवृत्तिः ॥ युक्तिभिरनुचिंतनं मननं विपरीताभावनानिवृत्तिमनस्तोर्थस्यैनैरंतर्येणानुसंधानं
निदिध्यासनं ॥ तेनान्यभावनानिवृत्तिः ॥ ततो मनसात्मतत्त्वसाक्षात्कारस्ततो मोक्ष इति ध्येयं ॥ तच्चेति (स्तप)
मननं चेत्यर्थः ॥ तल्लक्षस्य पूर्वपरामर्शित्वेनैव नियमोल्लाघवान्तत्व्यवहितपूर्वपरामर्शित्वं नागोरवात्तनि (राम ४)
तेन प्रकृते चात्मतत्वज्ञानस्यपरामर्शः तत्परामर्शे च मननोपायनित्यस्य वैयर्थ्यतापातात् ॥ प्रमाणाधीनमि
ति ॥ प्रमाणज्ञानाधीनमित्यर्थः ॥ युक्तिभिरनुचिंतनं मननं युक्तिश्च साधकबाधकप्रमाणोपन्यास इत्यतो
मननं प्रमाणज्ञानाधीनमिति भावः ॥ अत्र विषयादिचतुष्टयं कथं दर्शितमिति चेत् ॥ इत्थं ॥ प्रतिपाद्यं प्रमाण

अत्रहि जंतोः प्राणेषूत्क्राममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे

छ्

मस्य ग्रंथस्य विषयः ॥ प्रतिपाद्यो विषय इति लक्षणात् ॥ ग्रंथविषययोः प्रतिपाद्यप्रतिपादकभावः संबंधः ॥ मो
क्षसाधकं प्रयोजनं प्रमाणज्ञानमवांतरप्रयोजनं ॥ प्रयोजनकामस्त्वधिकारीति ॥ निरूपणीयत्वेन प्रतिज्ञा (प्यते)
तस्य प्रमाणस्य लक्षणं दर्शयति ॥ तत्र प्रमायाः करणं प्रमाणमिति ॥ तत्र निरूपणेषु मध्ये प्रतिज्ञाते निरूपणे ॥
सप्तम्यर्थश्च ज्ञाप्यज्ञापकभावः ॥ लक्षणवाक्येनैवाविषयत्वं ॥ न च प्रमाणमित्यनेनान्वयि ॥ तथा च प्रतिज्ञात निरूपणविषयी (प्रतिज्ञातं)
भूतं प्रमाणमिह वाक्येन लक्ष्यत्वेनावसेयं ॥ इदं च यन्निरूपणीयत्वेन प्रतिज्ञातं देवानेन लक्षणीयमिति शिष्यबुद्धि
वैशद्याय ॥ अन्यथा प्रमाकरणं प्रमाणमित्यस्यैवसाधीयस्त्वात् ॥ केचित्तु ॥ तत्र ॥ प्रमाणे निरूपणीये सतीत्यर्थ
माहुः ॥ अत्रादिप्रमाणमितिलक्ष्यभागस्य प्रमाणपदवाच्यमित्यर्थः तेन प्रमाणपदवाच्यत्वं लक्ष्यतावच्छेदकं
प्रमाकरणत्वं लक्षणं ॥ नातः प्रमीयतेनेनेति करणव्युत्पत्त्या प्रमाणशब्दस्य प्रमाकरणत्वार्थकतया नान्वयः
आत्मपदकृत्यानि ॥ करणं प्रमाणमित्युक्ते छिदिक्रियाकरणकुठारादावतिव्याप्तिरतो प्रमाकरणमिति ॥ तावत्युक्ते
दे॰ ... चक्षुरादावतिव्याप्तिरतः प्रमाकरणमिति ॥ ननु ... चक्षुरादेरपि कदाचित्प्रमाजनकत्वेन प्रमाणत्व
व्यवहारविषयतया लक्ष्यत्वान्नतत्रातिव्याप्तिरिति प्रपदं व्यर्थं ॥ न च ... तत्रातिव्याप्तिरिति वाच्यं तत्र हि दंडा
न ... लक्षणं येन तद्वारणाय प्रमेति व्याप्तिः स्यादिति चेन्न ॥ यत्र घर्षणादिना खंडच चक्षुरादौ तत्र तस्य मेवोत्पा
द्यतिनं तत्रातिव्याप्तिवारणाय प्रपदोपादानात् ॥ प्रमा प्रमाणमित्युक्ते इंद्रियात्मक प्रत्यक्षप्रमाणे व्याप्ति

प्र·प्रका·

रः प्रमाकरणमिति॥ प्रमाज्ञानेन विना न तदितिप्रमाणलक्षणस्य ज्ञातुमशक्यत्वात्प्रमां लक्षयति प्रमेति चेति
५ ॥ अत्रानुभवपदं स्मृतिव्यावृत्त्यर्थम्॥ अन्यथा यथार्थस्मृतिकरणेऽव्याप्तेः अनुभवप्रामाण्यलक्षणस्यापि स्मादि तिव्या २
तिभावः॥ ननु यथार्थज्ञानं प्रमाऽस्त्वेवं लक्षणमस्तु न चैवं स्मृतेरपि प्रमात्वापत्त्यान्तःकरणस्यापि प्रमाक
रणत्वापत्तिरिति वाच्यम्॥ इष्टत्वात्॥ न च स्मृतेः प्रमाणचातुर्विध्यविरोध इति वाच्यम्॥ तच्चातुर्विध्यस्यानुभ
जा वत्वमात्रनिविशिष्टप्रमाकरणाभिप्रायकत्वादित्यन आदयदाहुरिति॥ न्यायकुसुमाञ्जलावितिशेषः॥ आ
चार्याः॥ उदयनाचार्याः॥ यथार्थेति यथार्थानुभवो मानमनपेक्षतयेष्यत इति दिकारिका॥ अत्र मान
मितिपदं भावे ल्युडन्तं प्रमार्थकं॥ तथा च प्रयोगस्वरूपं॥ यथार्थानुभवः प्रमापदवाच्यः अनपेक्षत्वात्॥
स्वसमानाधिकरणस्वसमानविषयकज्ञानप्रमाण्याधीनप्रामाण्यकत्वादिति यावत्॥ यन्नैवं तन्नैवं
यथानुमितं यथा घटगोचरसंस्कारइति व्यतिरेकी॥ वक्तृवाक्यार्थज्ञानप्रामाण्याधीनप्रामाण्यकशाब्दानु लम्० ५
भवे ४ भवे सिद्धिवारणाय स्वसमानाधिकरणेति॥ ज्ञानविशेषणं॥ परात्मनिष्ठप्रामाण्याधीनप्रामाण्यकानुमि
त्यात्मकानुभवे सिद्धिवारणाय स्वसमानविषयकत्वमपि ज्ञानविशेषणं॥ व्याप्यज्ञानातिरिक्तविषयकार्थक
यथाक्तनसाध्यमादायानुमितिसमानविषयकत्वसत्त्वेऽपि परामर्शस्य तत्त्वेनासिद्धिताहवस्थानात्॥ स्मृतेस्तु
स्वसमानाधिकरणस्वसमानविषयकपूर्वानुभवप्रमाण्याधीनप्रामाण्यकत्वेन निरुक्तानपेक्षत्वरूपहे
प्प कै रूे

त्क्त
त्वभावान्नप्रमापदवाच्यत्वसिद्धिरित्यनुभवत्वघटितमेव प्रमालक्षणं युक्तं॥ कश्चित्तु स्मृतौ प्रमात्वव्यवहारस्तु संवादि
त्व २ प्रवृत्तिजनकयथार्थज्ञाननिबंधन एव॥ तथा च सूत्रमपि यथार्थाभिप्रायकमेवेति भावः॥ प्रमालक्षणप्रविष्ट तार्थी २
नु ३ योर्यथार्थानुभवयोर्लक्षणं॥ इष्टमित्यत आह किमित्यादि॥ इदं॥ प्रमालक्षणप्रविष्टं॥ यथार्थं लक्षयति तद्वतीति॥ ने
न संबंधेन तद्वति तेनैव संबंधेन तत्प्रकारकत्वं यथार्थत्वमित्यर्थः॥ तेन संयोगेन वह्निमति समवायेन वह्निप्रकारकप्र क्लि॰
तौ वह्निमानिति॥ भ्रमे नातिव्याप्तिः॥ लक्षणमिदं लक्ष्ये योजयति यथेत्यादिना॥ अत्र लक्ष्येनाह्नी साक्षात्कावृति॥
शंकते नन्विति॥ एवं॥ तद्वति तत्प्रकारकत्वं यथार्थत्वं चेत् रजतत्वाधारेषु इति॥ रजतत्वप्रकारकत्वं ज्ञानेत्व
र्थः॥ नेन रजतत्वस्य ज्ञानेऽसत्त्वेऽपि नक्षतिः॥ एवमेवाग्रे एवंजातीयकबोधानन्वेकस्यैव ज्ञानस्य किंचिदंशे प्रमात्वं किं
चिदंशेऽप्रमात्वं च विरुद्धमतस्तत्परिहाराय प्राचीनसंमतिमाह तदनितदनुभवइति॥ तथा च प्रमात्वाप्रमात्वयोर्विरोध प्रमात्व६
वेनाकि॥ शुक्तिरजतयोरिमेरजते इति ज्ञाने उभयस्यापि सत्त्वादिति भावः॥ शंकते शाखेति क्वचित्तु स्वकेन नु
शाखेतिपाठः॥ अत्र ज्ञाने वृक्षे कपिसंयोगभासने तदवच्छेदकत्वं च मूले तत्र कपिसंयोगोऽप्रमात्वमिष्टमेव॥
अवच्छेदकत्वांशेतु याथार्थ्यलक्षणमेव नाह्नीसाहवृक्षे कपिसंयोगप्रत्यय इति॥ अवच्छेदकत्वप्रत्ययस्तु॥
कपिसंयोगावच्छेदकत्वप्रत्ययस्तु॥ नतथा॥ न प्रमा तस्य मूलस्य तदनवच्छेदकत्वात्॥ कपिसंयोगानवच्छेदकत्वात्
दकत्वात्॥ अनुभवत्वं निर्वक्ति स्मृतिभिन्नेति॥ स्मृतावतिव्याप्तिवारणाय स्मृतिभिन्नेति॥ घटादावतिव्या

प्र.प्र. ज्ञानमयज्ञानत्वमिति॥ ननु स्मृतिभिन्नत्वं स्मृतित्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं स्मृतिभिन्नत्वं वाच्यं
६ ॥ अन्यथा स्मृतेरपि यत्किंचित्स्मृतिभिन्नत्वेनातिव्याप्तितादवस्थ्यात्॥ स्मृतित्वं च यदि संस्कारजन्यं॥ संस्कारज
न्यज्ञानत्वं तदा लक्षणे गौरवं॥ यदि च स्मृतित्वं जातिः स्मरामीत्यनुगतप्रत्ययात्॥ तदानुभवत्वमपि जाति ज्ञा३
रेव॥ अनुभवामीत्यनुगतप्रत्ययात्॥ तथा च तदेवानुभवलक्षणमस्त्विति शेषेणाद्यजातिविशेषोपाधेति
तस्य जातित्वे साधकमानुभवामीति॥ तन्नं सत्वमितनुगतप्रतीत्या मूर्त्तत्वस्येव जातित्वसिद्धेरत आह
बाधकं विनेति॥ तत्र संस्कारस्यैव बाधकस्य सत्त्वादिति भावः॥ वस्तुतः स्वसाक्षात्कारत्वमेवानुभवत्वं॥ घटा भवद्
दिसाक्षात्कार एवानुभवामीति प्रतीतिः॥ स्वर्गादिशाब्दबोधादावनुभवामीति प्रतीतेश्च॥ नचैवमनुमि
त्यादीनां निकारणामनुभवव्यवहारो न स्यादिति वाच्यं॥ तस्य स्वसमानज्ञानत्वरूपानुभवत्वविषयकत्वेन राम॰
संभवात्॥ स्मृतिकारणतावच्छेदकप्रविष्टमप्यनुभवत्वमिदमेव न तु जातिरूपमिति संक्षेपः॥ प्रमाण
लक्षणप्रविष्टं करणत्वं निर्वक्ति व्यापारवदिति॥ असाधारणेति॥ जन्यत्वानवच्छिन्नकार्यतानिरू नि॰६
पितकारणताश्रयत्वमसाधारणत्वं॥ ईश्वरज्ञानस्य च जन्यत्वावच्छिन्नमात्रं प्रति हेतुत्वान्नासाधारणकार
णत्वमिति भावः॥ निरुक्तकारणत्वघटितप्रमाणलक्षणस्यात्मन्यतिव्याप्तिमाशंकते नन्विति॥ एवं भ
व्यापारवदसाधारणकारणस्य करणत्वे ज्ञानमप्रतीति॥ ज्ञानसामान्यं प्रति कारणत्वमप्रमात्मनि का=

रणत्वनाशगदतिव्याप्तिरिति भावः॥ तज्जन्यत्वे सतीति॥ अत्र तच्छब्दः करणपरः॥ ननु तज्जन्यत्वं फलेपि सत्त्वात्त
ज्जन्यजनकत्वमिति। तज्जन्यजनकत्वस्येश्वरज्ञानादावपि सत्त्वात्तज्जन्यत्वे सतीति॥ इष्टापत्त्यातां परिहरति स्यादेवेति
॥ नचैवमात्मा प्रमाणांतरं स्यात्तथा च न चातुर्विध्यं व्याहन्येतेति वाच्यं॥ प्रत्यक्षादिप्रमाकरणत्वेन तत्तत्प्रमा
करणत्वेन तत्तत्प्रमाण एवांतर्भावात्॥ नन्वेकस्य प्रत्यक्षानुमानादिप्रमाकरणत्वं विरुद्धमिति वाच्यं॥ एकस्यैव
मनसः प्रत्यक्षानुमितिकरणत्वेन प्रत्यक्षत्वस्यानुमानत्वस्य च लिंगकारणतावादिमते एकस्यैव दृष्टमानत्वे
सादिशाब्दस्य च गगनपक्षकेतरभेदानुमितिकरणत्वेनानुमानत्वस्य च शाब्दप्रमाकरणत्वेन शाब्दप्रमाणत्व
स्य च दृष्टत्वेनाविरोधादिति भावः॥ नन्वात्मनः प्रमां प्रति करणत्वे कर्तृत्वव्यवहारो न स्यात् व्यवहारभेदे व्य
वहर्त्तव्यभेदस्य नियामकत्वादत आह उपाधीनामिति। तथा च व्यवहर्त्तव्यतावच्छेदकभेद एव व्यवहारभेद
नियामको न तु व्यवहर्त्तव्यभेदः॥ अन्यथा एकस्यैव पुंसि पाचकपाठकादिव्यवहारो न स्यादिति भावः॥ अत
एव एकत्र धर्मिणि कर्तृत्वकरणत्वस्वीकारादेव विवक्षातः कारकमिति॥ काष्ठेन पचति काष्ठं पचति स्थाल्यां पच
ति स्थाली पचतीत्यादौ करणत्वादिविवक्षाधीनादेव तृतीयाप्रथमादयो भवंतीत्यर्थः॥ ननु तत्र किं नाम कार
कत्वं॥ उच्यते॥ विभक्त्यर्थद्वारा क्रियान्वयित्वं सुबर्थगौणोभयसाधारणं तच्च क्रिया च विलक्षणव्यापार
रूपो धात्वर्थः॥ स्तोकं पचतीत्यादावसंभवेन पाकान्वयिनः स्तोकादेर्वारणाय विभक्त्यर्थद्वारेति। स्तोक

मं॰प्र॰ मितिकयोरित्यनुप्रासनानुशिष्टद्वितीयान्तकारकविभक्तिं विंतप्रयोगसाधुत्वार्थं कैवेतिनदोषइति॥ क्रिया
७ हेतुत्वमात्रंमुख्यत्वंतु॥ चैत्रोग्रहंजानातीत्यादौचैत्रादेर्मुख्यकारकत्वं॥ ईश्वरःसर्वंजानातीत्यादावीश्वरा
देर्गौणंतत्तु॥ तस्यानस्यानित्यत्वात्॥ तत्रकारकंषोढा॥ तथाचोक्तं॥ कर्त्ताकर्मचकरणंसम्प्रदानंतथैवच॥
अपादानाधिकरणेइत्याहुःकारकाणिषडिति॥ तत्रक्रियाश्रयःकर्त्तेतिवैयाकरणाः यथाचैत्रःपचती
त्यादौचैत्रे॥ विक्लित्त्यनुकूलविलक्षणव्यापाररूपपाकाश्रयत्वात्॥ घटोनश्यतीत्यादौप्रतियोगितास
बंधेननाशरूपक्रियाश्रयत्वस्यघटेसत्वान्नाव्याप्तिः॥ परेतुकारकांतराप्रयोज्यत्वेसतिकारकांतर
प्रयोजकत्वंकर्तृत्वं॥ स्वतंत्रःकर्त्तेतिसूत्रानुसारात्॥ छिदिक्रियाद्यनुकूलसंयोगादिरूपव्यापारज
नकतयाकर्मकारकप्रयोजकेकुठारादावतिव्याप्तिवारणायसत्यंतं॥ नचैवंतस्यकर्तृप्रयोज्यत्वा
त्वाद्दोषः॥ चैत्रस्तंडुलंपचतीत्यादौतंडुलस्यापिचैत्रेणप्रतिव्याप्तिवारणायविशेष्यभागइत्याहु
का॰नां॰४ तदुभयमपिन॥ अचेतनेभिपुंतीत्रिकाण्णांतस्यस्वरसतःकर्तृप्रयोगाभावेनतत्साधारणलक्ष
णकरणस्यानुचितत्वात्॥ तस्मात्क्रियानुकूलकृतिमत्वंकर्तृत्वं॥ इष्टंचाचेतनेकाष्ठंपचतीत्यादौक राम॰
र्तृप्रयोगोगौणइति॥ परसमवेतक्रियाजन्यफलशालित्वंकर्मत्वं॥ नद्युक्तंकर्तुरीप्सिततमंकर्मेति॥ कर्तुः ७
कर्मप्रयोगोगौणइति क्रियाजन्यफलशालित्वं तथा आप्तुमिष्टतममितिसूत्रार्थः॥ चैत्रोग्रामंगच्छतीत्यादौ

तिक्रि
चैत्रादेर्वारणायपरसमवेतेतिक्रियाविशेषणं॥ परत्वमत्रकर्मत्वेनाभिमतावधिकंग्राह्यं॥ चैत्रस्यस्वत्वावधि
कपरसमवेतक्रियाजन्यफलवत्वाभावान्नातिव्याप्तिः फलमत्रधात्वर्थतावच्छेदकमेवग्राह्यं॥ तेनग्रामंगच्छती
त्यादौगमनजन्यविभागाश्रयपूर्वदेशेनातिव्याप्तिः॥ पूर्वदेशविभागस्यगमिधात्वर्थतानवच्छेदकत्वात्॥ उ
त्तरसंयोगावच्छिन्नकर्मण एवतद्धात्वर्थत्वादिति॥ असाधारणकारणत्वंकरणत्वं॥ साधकतमंकरणमितिसू
त्रस्यापिअयमेवार्थः॥ साधकतमशब्देनासाधारणहेतोरेवाभिधानात्॥ कुठारेणदारुछिनत्तीत्यादौकालादे
कारणं६ र्वारणायासाधारणपदं॥ व्यापारवत्कारणंकरणं॥ तत्प्रपंचस्कंधएवसुव्यक्ततरनिजताभिस्नापसू
त्यादौतुकरणत्वंनततीयार्थः॥ किंतुजन्यत्वविशिष्टं॥ जटाविशिष्टस्तापसइत्यर्थः॥ क्रियाकरणीभूतकर्म
जन्यफलभागित्वेनोद्देश्यत्वंसंप्रदानत्वं॥ तथाचसूत्रं कर्मणायमभिप्रैतिससंप्रदानमिति॥ कर्मणाकर्मजन्य
देशीय५ फलभागित्वेनयंअभिप्रैतिउद्देश्यीकरोतिकर्त्तासःसंप्रदानमितितदर्थः॥ चैत्रोग्रामंगच्छतीत्यादौगमनकर्मत्व
जन्यसुखभागित्वेनोद्देश्यस्यचैत्रादेःसंप्रदानत्ववारणायक्रियाकरणीभूतेतिकर्मविशेषणंस्वरूपसत्॥ शब्द
त्र बोधेतस्यभानाभावात्॥ इष्टंचतत्प्रयोगेगमनक्रियायांग्रामस्याकरणत्वान्नदोषः॥ दानादिक्रियायांचदेव
गवादिकंकरणमेवेतिनासंभवः॥ उदाहरणंचविप्रायगांददातीत्यादि॥ अत्रदानक्रियायांकरणीभूतगोजन्य
फलंदुग्धादिर्भागित्वेनविप्रस्योद्देश्यत्वात्संप्रदानत्वं पित्रादिसुखमुद्दिश्य कृतेगोदानेचदानज
श्री दे सु

सं॰प्र॰ न्यफलाभागित्वेनोद्देश्यः पित्रादिर्नतु गोजन्यफलभागित्वेनेति न तस्य संप्रदानत्वं यदि चेत्रागे पित्रादेः सुख
८ मुत्पाद्यिष्यतीत्यभिप्रायस्तदा फले कर्मजन्यत्वमदृष्टद्वारकं वाच्यमिति यच्च गोजन्यफलभागित्वेन विप्रोद्देश्य
त्यागोकर्मत्यागविशेषरूपदानानुकूलकृतिमानित्यन्वयधीः॥ एवं वृक्षायोदकं सिंचति राजे दंडं ददातीत्या
दौ वृक्षादेः संप्रदानत्वं॥ नारदायरोचते कलह इत्यादौ तु न संप्रदाने चतुर्थी किंतु रुच्यर्थानां प्रीयमाण इ
त्यनुशासनेन विहिता संबंधार्थिका॥ नारदस्य रुचिविषयः कलह इत्यर्थः॥ वस्तुतस्तु क्रियाकर्मीभूतद्रव्य
निष्ठस्वत्व भागित्वेनोद्देश्यत्वं संप्रदानत्वं विप्रस्य गोनिष्ठस्वत्वभागित्वेनोद्देश्यत्वात्संप्रदानत्वं॥ दानेन गवि विप्र
स्य स्वत्वोत्पादात्॥ पित्रादेस्तु गोनिष्ठस्वभागित्वेनोद्देश्यत्वाभावान्न तत्त्वं॥ उक्तंच कर्मणा यमभिप्रैति स संप्रदान
मिति सूत्रे कर्मणेत्यस्य कर्मनिष्ठस्वत्वभागित्वेनेत्यर्थः॥ अन्ये सर्वे प्राग्वत्॥ तथाच गोनिष्ठस्वत्वभागित्वेन वि
प्रोद्देश्यकगोकर्मकदानकर्त्तेत्यन्वयधीः॥ एवंच वृक्षायोदकं सिंचतीत्यादौ वृक्षादेः सेकजन्यवृद्धिभागित्वेनोद्दे
श्यत्वमात्रेण गौणं संप्रदानत्वं वृद्धिभागिनया वृक्षोद्देश्यकजलकर्मकसेककर्त्तेत्यन्वयबोधादिति॥ परसमवेतक्रि
याजन्यविभागाश्रयत्वमपादानत्वं॥ तथाच सूत्रं॥ ध्रुवमपायेऽपादानमिति॥ अपायो विभागस्तज्जनकक्रियाश्रयत्वे
ध्रुवं विभागजनकक्रियाशून्यं यत्तदपादानमित्यर्थः॥ यथा वृक्षात्पर्णं पततीत्यादौ [illegible]
[illegible] पादानत्ववारणाय परसमवेतेति क्रियाविशेषणं सफलं संगतं॥ इत्थंच वृक्षनिष्ठवि
२दौ वृक्षादेनिरुक्तं अपादानत्वं अत्रैव प्रयोगे पर्णादेर

रत्ना॰ ८

भागजनकपतनाश्रयः पर्णमित्यन्वयबोधः अत्र निष्ठत्वं जनकत्वं च संसर्गः॥ वृक्षाद्विभजते पर्णमित्यादौ तु न
निरुक्तापादाने पंचमी किंत्ववधौ॥ अवधित्वं च स्वस्वरूपसंबंधरूपमपादानत्वं॥ इत्थंचापादानपदेनानार्थकं
तेन वृक्षावधिकविभागाश्रयः पर्णमिति वाक्यार्थबोध इति॥ कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे सति क्रियोपकार
कत्वमधिकरणत्वं॥ आधारोऽधिकरणमिति सूत्रस्य एतदर्थपरतया व्याख्यातिकैर्व्याख्यातत्वात्॥ अन्यथाऽसंभवापत्तेः रत्ना॰ ४
॥ गेहे पचतीत्यादौ गेहस्य साक्षात् [illegible] पाकाश्रयत्वाभावात्॥ कर्मादावतिव्याप्तिवारणाय सत्यंतं॥ चै
त्रस्य तंडुलं मैत्रः पचतीत्यादौ कर्मद्वारा पाकाश्रये संबंधिनि चैत्रेऽतिव्याप्तिवारणाय विशेष्यं॥ गेहे चैत्रस्तंडुलं
पचतीत्यादौ गेहस्य कर्तृद्वारा पाकाश्रयत्वात्सत्वाल्लक्षणसमन्वयः॥ पाककर्तृश्चैत्रादेर्गेहादिना संयोगसत्वात्
स्थाल्यामोदनं पचतीत्यादौ स्थाल्यादेः कर्मद्वारा पाकाश्रयत्वाल्लक्षणसमन्वयः॥ पाककर्मौदनस्य स्थाल्या सह सं
योगसत्वात्॥ इत्थंच क्रियापदं विना गेहे घट इत्यादि प्रयोगो नेति वैयाकरणाः॥ निरुक्ताधिकरणत्ववदाधेयत्वम
पि संसर्गमर्यादया॥ सच निरूपकतासंबंधेन यत्रान्वेति तत्राप्यधिकरणकारकत्वव्यवहारः॥ अत एव भूतले घट
इत्यादि क्रियाशून्यवाक्यात्॥ भूतलनिष्ठाधेयो घट इति निरवच्छिन्नो बोधस्स्वस्यैवेति नैयायिकाः॥ चर्मणि द्वीपिनं हंतीत्या
दौ तु नाधिकरणे सप्तमीति किंतु निमित्ते॥ निमित्तात्कर्मयोगे इत्यनुशासनात्॥ निमित्तवाचकशब्दात्सकर्मक
धातुयोगे सप्तमीति सूत्रार्थः॥ निमित्तत्वमुद्देश्यत्वं॥ इत्थंच चर्मोद्देश्यकद्वीपिकर्मकहननकर्त्तेत्यन्वयबोधः

घनेवर्षतिविप्रः समागत इत्यादौ हेतुसप्तमी॥ भावेचेत्यनुशासनात्॥ यस्यक्रियया न्यस्य क्रियान्तरंल
क्ष्यते स भावस्तत्र सप्तमीति तदर्थः॥ क्रियाच समानकालीनत्वं सतिसप्तम्यर्थः॥ घनवृष्टिसमानकाली
१ नसमागमनाश्रयो विप्र इति वाक्यार्थबोधात्॥ वस्तुतस्तु सामानाधिकरण्यं सतिसप्तम्यर्थः॥ तच्च क
चित्कालिकं क्वचिद्दैशिकं चेति द्विविधं॥ तत्राद्यमुक्तोदाहरणे॥ द्वितीयं द्रव्यकर्मान्यत्वे सति सत्तावान्
गुण इत्यादौ द्रव्यकर्मान्यत्वसमानाधिकरणसत्तावान् गुण इति वाक्यार्थबोधात्॥ नच सूत्रविरोधः॥ त
त्रभावपदस्य धर्ममात्रपरत्वात्॥ तथाच येन धर्मेण धर्मान्तरं लक्ष्यते तत्र सप्तमीति सूत्रार्थः॥ षष्ठी तु
न कारकविभक्तिः॥ चैत्रस्य तण्डुलं पचतीत्यादौ संबन्धिनश्चैत्रादेः पाकहेतुत्वाभावात्॥ अत एव
षष्ठी शेषे इत्यनुशासनेन शेषपदवाच्यसंबन्धसामान्यार्थकत्वं तस्याः प्रतिपादितमिति संक्षेपः॥ अ
त एव आत्मनो ज्ञानकरणत्वादेव॥ तृतीयेति॥ करणत्वार्थिका संगृह्णत इति शेषः॥ सर्वथा[illegible]त्वेनानुग
तमत्वानुपपत्तेराहारकडोपाधिरूपमिति॥ चक्षुरादौ तेजस्त्वादिना संकरात्तज्जातिरूपं न दिति भावः॥
एतन्मनस्त्वनात्मादेर्ज्ञानकारणत्वं॥ करणाकारानुगतमनस्त्वत्वाभावेन तदुपाधेरपि सत्त्वात्॥ अंगीच
कुरिष्यत्स्वरसोद्भावनंतरं बीजं तु आत्मा नमात्मनावेत्तीति तृतीयानुपपत्तिरिति॥ वस्तुतस्तु आत्मान्
मात्मनैव वेत्तीति वाक्यमीश्वरपरमेव॥ तथाच तज्ज्ञानस्य नित्यत्वान्न तत्कारणत्वमीश्वरात्मन इत्याक्षे

पस्य॥ आत्मनास्वभावेनैव करणादिनैरपेक्ष्येण स्वविषयकज्ञानवानसि नत्त्वस्मदादिवदन्तःकरणादिसापेक्षज्ञान
वानसीति॥ यदि तु जीवपरं तदात्मनो मनः करणेनेत्यर्थः॥ तस्मादुभयथापि नात्मनः करणत्वमिति॥ उद्दिष्टं
प्रमाणं विभजते नन्वप्रमाणं चतुर्विधमिति॥ प्रतिज्ञातं चातुर्विध्यं सूत्रकारसंमतिव्याजेन दर्शयति यत इति प्रत्यक्षे
ति॥ प्रत्यक्षानुमानोपमानशाब्दाः प्रमाणानीति सूत्रं॥ अत्र प्रमाणमुद्दिश्य प्रत्यक्षादिचतुष्टयं विधीयते तत्र विधे
यतावच्छेदकं न प्रत्यक्षत्वादि प्रातिस्विकरूपं॥ वाक्यभेदापत्तेः॥ विधेयतावच्छेदकावच्छिन्नभेदेनैस्याभ्युपगमा
त्॥ किंतु प्रत्यक्षादिचतुष्टयान्यतमत्वं॥ ननु चाष्टाद्येन रूपेण विधेयस्य प्रतिनियतस्तदेव विधेयतावच्छेदकमित्यु
च्यते॥ नचान्यतमत्वेन प्रत्यक्षाद्युपस्थितिः॥ गौरवेणातिप्रसक्तत्वेन च तस्य प्रत्यक्षादिपदप्रवृत्तिनिमित्तत्वा
भावात्॥ तथाच प्रकृते कथं तद्विधेयतावच्छेदकमिति चेन्न॥ सर्वत्र विभागवाक्ये चरमपदे विभजनीयतावदन्य
तमत्वनिरूढलक्षणाभ्युपगमात्तेनरूपेण प्रत्यक्षाद्युपस्थितिसंभवात्॥ एवं च सूत्रे यत्प्रमाणं तत्प्रत्यक्षादिच
तुष्टयान्यतममिति व्याप्यव्यापकभावोऽभिमत इति न न्यूनाधिकसंख्याव्यवच्छेदबोधः॥ अत एव न्यूनाधिकत्वयोरि
ति योग्यता विभागवाक्यस्येति॥ केचित्तु सर्वत्रैवकारमध्याहृत्य न्यूनाधिकसंख्याव्यवच्छेदबोध इति वदन्ति
तन्न॥ सूत्रे एवकाराध्याहारदोषप्रसंगात्॥ अत्रैवकारस्यान्ययोगव्यवच्छेदमात्रे शक्तिः सर्वत्र तद्बोधस्यैव क
ल्पनीयत्वात्॥ तथाहि॥ एवकारेण नियमपरवाक्ये न्ययोगव्यवच्छेदकावच्छेदेनेतरपदार्थस्य समभिव्याहृत

द जन्य

मं॰त्र पदार्थान्ययोगव्यवच्छेदबोधो जन्यते॥ यथा शंखः पांडुर एवेत्यादौ शंखत्वावच्छेदेन शंखे विशेष्ये पांडु

९॰ रान्ययोगव्यवच्छेदबोधः क्रियते॥ शंखत्वावच्छिन्नः पांडुरान्ययोगाभाववानिति॥ पार्थ एव धनुर्धर इत्या

दौ च धनुर्धरत्वावच्छेदेन धनुर्धरविशेष्ये पार्थान्ययोगव्यवच्छेदबोधः॥ धनुर्धरत्वावच्छिन्नः पार्थान्य

नि॰ योगाभाववानिति बोधः॥ धनुर्धरपदस्योत्कृष्टधनुर्धरे लक्षणाश्रयणात्॥ संभवाभिप्रायेणायुक्तत्वा

न्नीलं सरोजं भवत्येवेत्यादौ तु अत्यन्तायोगव्यवच्छेदकस्य योग्यत्वादि सामानाधिकरण्येन नीलभवनकर्तृत्व

योगव्यवच्छेदबोधः॥ सरोजत्वावच्छिन्नं नीलभवनकर्तृत्वायोगाभाववदिति॥ अत्रान्ययोगव्यवच्छेदत्वाद

योगव्यवच्छेदबोधः॥ सरोजत्वावच्छिन्नं नीलभवनकर्तृत्वान्ययोगाभाववदिति॥ क्वचित्तु भेदान्वयबोधक

त्वरूपयोगघटितो ऽभेदान्वयबोधकपांडुरादिपदसमभिव्याहारवशाल्लभ्यते॥ क्वचित्तु भेदान्वयबोधक

पदसमभिव्याहारवशात्समवेतत्वसंयुक्तत्वादिरूपयोगघटितोऽपि॥ यथा पृथिव्यामेव गंधः वह्निमत्येव धूम

इत्यादौ॥ अत्र समवेतत्वसंयुक्तत्वाद्युपस्थापकसप्तमीसमभिव्याहारेण पृथिव्यन्यसमवेतत्वाभाववान् गंधः तप

॥ वह्निमदन्यसंयुक्तत्वाभाववान् धूम इत्यन्वयबोधात्॥ चैत्रस्यैवेदं धनमित्यादौ च स्वत्वरूपयोगघटि रा॰प॰

तः॥ स्वत्वबोधकषष्ठीसमभिव्याहारेण इदं धनं चैत्रान्यस्वत्वाभाववदिति तत्र बोधात्॥ न च ज्ञानमर्थ १०

गृह्णात्येवेत्यादौ ज्ञाने ऽर्थग्राहकत्वान्ययोगव्यवच्छेदबोधो बाधित इति वाच्यं॥ तत्र गृह्णातीत्यारख्यान

स्यार्थग्राहकत्वाश्रयेऽज्ञानाश्रयणेन ज्ञानत्वावच्छेदेनार्थग्राहकत्वान्ययोगव्यवच्छेदबोधस्यैवाबाधे

यं२ ॥

त्वात्॥ चैत्रो जलमेव भुंक्ते इत्यादौ चैत्रे जलान्यभोजनकर्तृत्वस्य मैत्रेण पायसमेव भुज्यते इत्यादौ पायसान्यस्मिन्

मैत्रकर्तृकभोजनकर्मत्वस्य॥ देवदत्तस्यैवार्थाभाते सादौ अस्मिन् पुंसि देवदत्तान्यभातृत्वस्य च व्यवच्छेदो लक्ष

णया प्रत्याय्यते॥ जलान्यभोजनकर्तृत्वादीनां जलाद्यन्यसंबंधित्वाभावेन तद्व्यवच्छेदस्यैवकारसंबंधात्वादि

त्याद्युक्तं॥ इदं तु बोध्यं॥ एवकारसंवलितवाक्ये क्वचित् एवकारासंवलनेऽपि यादृशो बोधो ऽनुभवसिद्धस्तादृशबोधो

त्पाद्यते॥ यथा पृथिव्यामेव गंध इत्यादौ पृथिव्यन्यसमवेतत्वाभाववान् पृथिवीसमवेतत्वाद्वा गंध इ

ति जायत एव॥ यथा पृथिव्यामेव गंध इत्यादौ पृथिव्यन्यसमवेतत्वाभाववानिति पृथिवीसमवेतत्वात् बोधान्यगंधइ

ग॰द त्यादि॥ अन्यथैवकारमात्रजन्यबोधाभ्युपगमे सप्तम्युपस्थापितस्य समवेतत्वादेरनन्वयापत्तेः॥ अत्र पृथिवीप

भ्योर॰ दार्थस्यैवकारार्थस्य च परस्परं योरप्यन्वयो युक्तत्वे वैचित्र्यात्॥ एवं चैत्रस्यैवेदं धनमित्यादावपि बोध्यं अन्यथा

षष्ठ्युपस्थापितस्वत्वानन्वयापत्तेरिति॥ संप्रदायविदः॥ विशेषणसंगतैवकारस्यायोगव्यवच्छेदोऽर्थः॥ शं

खः पांडुर एवेत्यादौ शंखः पांडुरत्वायोगाभाववानित्यन्वयबोधात्॥ विशेष्यसंगतैवकारस्य चान्ययोगव्य

वच्छेदोऽर्थः॥ पार्थ एव धनुर्धर इत्यादौ धनुर्धरः पार्थान्ययोगाभाववानित्यन्वयबोधात्॥ क्रियासंगतैवकारस्य

चात्यंतायोगव्यवच्छेदोऽर्थः॥ नीलं सरोजं भवत्येवेत्यादौ॥ सरोजं नीलभवनकर्तृत्वात्यंतायोगाभाववदित्यन्व

यबोधादित्याहुस्तच्चिन्त्यं॥ शक्तित्रयकल्पनायां गौरवात्॥ किंचात्यंतिकत्वस्यावच्छिन्नावच्छेदकव्यापकत्वरूप

त्वादत्यन्तायोगव्य॰व्यवच्छेदो ऽसंभव इति कोऽपि॥ तथाहि॥ अत्यंतायोगव्यवच्छेदशब्दार्थो यदि आत्यंतिकस्यायो

व्य

स्य
गस्यव्यवच्छेदः आत्यंतिकः अयोगव्यवच्छेदोवा॥ नाद्यः। सरोजत्वव्यापकस्यनीलभवनकर्तृत्वायोगस्या
मं.प्र. प्रसिद्धेः॥ नान्त्यः सरोजत्वव्यापकस्यनीलभवनकर्तृत्वायोगव्यवच्छेदस्याप्यप्रसिद्धेः॥ अथायोगेआत्यं
११ तिकत्वस्यव्यवच्छेद एवात्यंतायोगव्यवच्छेदस्याग्रार्थः॥ नीलंसरोजंभवत्येवेत्यादौसरोजनिष्ठनीलभवनक
र्तृत्वायोगेसरोजत्वव्यापकत्वरूपात्यंतिकत्वस्यप्रत्यात्वादोप्रसिद्धस्यव्यवच्छेदबोधसंभवात्॥ सरोजपदंच
एते५ सरोजत्वेनलक्षणकंतेनसरोजविशेषणत्वेनोपस्थितस्यसरोजत्वस्यनात्यंतिकत्वेऽन्वयइतिपरास्तं॥ सरो
जपदाल्लक्षणयास्वात्यंतसमणसरोजत्वोपस्थितेरितिचेन्न। नीलभवनकर्तृत्वायोगेसरोजत्वव्यापकत्वरूपात्यं
तिकत्वव्यवच्छेदबोधस्यनीलभवनकर्तृत्वायोगव्यवच्छेदः किंचित्सरोजनिष्ठइत्यत्रैवपर्यवसानात्सरो
जत्वसामानाधिकरण्येननीलभवनकर्तृत्वायोगव्यवच्छेदबोधएवात्यंतायोगव्यवच्छेदइत्यंगि
स्वीकारेणेति॥ वक्ष्यमाणविशेषणसंगतैवकारस्यायोगव्यवच्छेदोर्थइत्यपिनयुक्तं॥ शंखःपांडुरएवेत्यादौ
पांडुरत्वादेःपांडुरविशेषणत्वेनोपस्थितस्यायोगेऽन्वयासंभवेनतत्रस्वेपांडुरत्वायोगव्यवच्छेदबोधासंभ राम०
वात्॥ नचलक्षणयापांडुरपदस्यपांडुरत्वमेवार्थइतिनेनरविशेषणत्वेनोपस्थितिरितिवाच्यं। तथासं ११
तिशंखःपांडुरत्वमेवेत्यादिप्रयोगापत्तेः॥ शंखःपांडुरएवेत्यादिवदनापिपांडुरत्वायोगव्यवच्छे
दबोधसंभवात्॥ तस्मादन्ययोगव्यवच्छेदमात्रेसर्वत्रैवाकारार्थइति॥ नन्वत्यन्तायोगव्यवच्छेदमात्रे

नकिंस्तथाप्येवकारस्यावधिविशिष्टव्यवच्छेदस्यैकदेशोऽन्वयेकथंपार्थादिः पदार्थस्यान्वयः। पदार्थः पदार्थेनैवान्वेति
ननुपदार्थैकदेशेनेतिव्युत्पत्तेः॥ अन्यथाघटोनपटइत्यपिस्यात्॥ घटान्योन्याभावस्यनञर्थस्यघटपदार्थैकदे
शेघटत्वेऽन्वयसंभवादितिचेन्न॥ क्वचिदेकदेशान्वयस्यापिस्वीकारात्॥ यथाघटात्परःपटइत्यादौपंचम्य
दा पर्थेघटस्यावधित्वस्यपरपदार्थैकदेशेपरत्वे॥ घटावधिकपरत्ववान्पटइत्यन्वयबोधादित्यलमप्रसक्तानुचिंत
नेनेति॥ तत्रावच्छिन्नधर्म्यंशे। प्रत्यक्षस्यप्रत्यक्षत्वंहिष्टत्वात्सर्वसंनप्रत्यक्षमाहसाक्षात्काररूपेति। अनुमा
नादावतिव्याप्तिवारणायसाक्षात्कारेतिप्रमाविशेषणं॥ स्वयंसाक्षात्करोमीतिप्रतीतिः॥ इंद्रियजन्यज्ञान
त्वेति॥ इंद्रियजन्यज्ञानएवसाक्षात्करोमीतिप्रतीतेरिंद्रियजन्यज्ञानत्वमेवसाक्षात्कारत्वंनतुजातिरू
पमितिभावः॥ ज्ञानमात्रस्येति॥ तथाचानुमित्यादावपिसाक्षात्करोमीतिप्रतीतिःस्यादितिभावः॥ नन्विं
द्रियत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयज्ञानत्वमेवसाक्षात्कारत्वंतच्चनानुमित्यादौमनस
स्तत्रमनस्त्वेनैवहेतुत्वात्तथाचतत्रनतथाप्रतीतिरित्यस्वरसादाहइंद्रियाप्रतीतेरिति॥ तथाचेंद्रियज्ञा
नि० नंविनातद्व्यक्तिनिरूढकतत्त्वमज्ञानाभावान्निरूढकतत्त्वस्यसाक्षात्करोमीत्यत्रविषयत्वमितिभावः॥ प्र२
चाक्षुषादिज्ञानएवसाक्षात्करोमीतिप्रतीतेःप्रत्यक्षत्वाद्विजातिविषयत्वेवसेत्याशयेनाहनापीति॥ अ
ननुगतत्वादिति॥ तथाचसाक्षात्करोमीत्यनुगतप्रतीत्यनुपपत्तिरितिभावः॥ अलौकिकप्रत्यक्षानंत

मं॰प्र॰ रंसाक्षात्करोमीत्यिमनीते लौकिकप्रत्यक्षज्ञानं तस्यैव न व्याप्नोतीत्यलौकिकविषयताशालिज्ञानत्वमेव नत्वती
न्द्रियविषयो न तु लौकिकालौकिकसाधारणजातिरूपसाक्षात्कारत्वं॥ किंच तस्य जातित्वे प्रमाणाभावः॥ न चेन्द्रि
२२ यजन्यतावच्छेदकतया तस्य जातित्वसिद्धिः॥ तस्य नित्यसवृत्तितया कार्यतानवच्छेदकत्वादित्यरुचेर्लक्षणां
तरमाद्ययदाजन्यधीति॥ लक्ष्येऽलक्षणं संगमयति भवतीदीति॥ अनुमितित्वादित्यादिपदेन उपमितित्वशाब्द
त्वस्मृतित्वादीनां संग्रहः॥ अत्र द्विजन्यं ज्ञानं व्याप्तिज्ञानमनुमितिद्वारा व्याप्यज्ञानं पदज्ञानं स्मृतिरनुभवादि
श्चतज्जन्यमनुमित्यादि तन्मात्रवृत्तिरनुमितित्वादि जातिस्तच्छून्यज्ञानत्वं साक्षात्कारमात्रस्यार्थः॥ अ
अतिव्याप्तिः॥ चज्ञानत्वसाक्षात्कारत्व मित्यत्रोऽनुमित्यवृत्तेरनः शून्यान्तरोपविशेषणं॥ जातिशून्यज्ञानत्वं तत्व
मित्यत्रेवासंभवः॥ ज्ञानत्वादिजातेस्तत्र सत्वादतो जन्यधीजन्यमात्रवृत्तीति जातिविशेषणं॥ जन्यधीज
न्येतरावृत्तित्वसति जन्यधीजन्यवृत्तित्वं तन्मात्रवृत्तित्वं॥ ज्ञानत्वादिकं च जन्यधीजन्येतरेश्वरज्ञाने निर्वि रामः॰
कल्पकवृत्तित्वान्न तादृशं किंत्वनुमितित्वादिकमेव तच्छून्यत्वस्य च न तत्र सत्वान्नासंभव॥ जन्यधीजन्यवृत्ती १२
त्यत्रकेपितथा॥ ज्ञानत्वादेर्जन्यधीजन्यसविकल्पकादिवृत्तित्वात्तस्य च तत्र सत्वाददोषाच्चेति॥ ज्ञानत्वादिकं च
नतादृशं किंत्वनुमितित्वादि तच्छून्यत्वस्य च तत्र सत्वान्नासंभवः॥ चाक्षुषत्वादिजातेरपि ईश्वरधीजन्य
चाक्षुषादिमात्रवृत्तित्वात्तदतिचाक्षुषादावव्याप्तिरतः प्रथमं जन्यपदं॥ चाक्षुषत्वादिजातिश्च जन्यज्ञा

नाजन्यनिर्विकल्पकेपिवृत्तित्वान्न तन्मात्रवृत्तिः किंत्वनुमितित्वादिरेव तच्छून्यत्वस्य तत्र सत्वान्नव्याप्तिरिति
असंभववारकं॥ ईश्वरप्रत्यक्षेन्यादृशचाक्षुषत्वादिजातिशून्यत्वसत्वेन लक्षणसत्वाय तद्वदिचेश्वरप्रत्यक्षे साक्षा ल
त्कारत्ववच्चाक्षुषत्वादिकमप्यस्ति॥ जन्यसाक्षात्कारत्वस्येन्द्रियजन्यतावच्छेदकत्ववत्तज्जन्यचाक्षुषत्वादेरे व
वच्छेदकत्वादिजन्यतावच्छेदकत्वं॥ उपाधिसंकरव्याप्यजातिसंकरोप्यनिदोषः॥ अत एव तत्प्रत्यक्षचक्षुः संयोगो
त्पन्नं सादि[illegible]चाक्षुषादिज्ञानप्रतिपाद्यं तौ मयाख्यत्नैवसंगच्छते॥ तदा धीजन्यमात्रवृत्ति
जातिरनुमितित्वादिरेवेति न तच्छून्यचाक्षुषादावव्याप्तिरप्यत आह प्रथमं जन्यपदं न देयमेवेति बोध्यं॥ जन्यज्ञ
न्यमात्रवृत्तीत्यत्रेश्वरशरीरादिनाजन्येनजन्यचाक्षुषादिमात्रवृत्तिचाक्षुषत्वादेश्चाक्षुषादौ सत्वात्तु न त्व्या
व्याप्तिरतो धीपदोपादानं॥ जन्यधीमात्रवृत्तीत्युक्तावपि जन्यधीचाक्षुषादिमात्रवृत्तिचाक्षुषत्वादेस्तत्र
सत्वात्तु न रव्याप्तिरतो द्वितीयं जन्यपदं जातिपरस्तेन धर्मत्वेनैक्यासविकल्पकेऽव्याप्तिः॥ सविकल्पक स्थानेक
त्वरूपस्योपाधेः धर्मत्वस्य तत्र सत्वादतो जातीति॥ सविकल्पकत्वं तु न जातिश्चाक्षुषत्वादिना संकरात्॥ साक्षा कत्वं४
जातिशून्यत्वं च तादृशजातित्वावच्छिन्नप्रतियोगिकता[illegible]तना भाववत्त्वं॥ नेत्तादृशजात्यनुमि
दि तित्वप्रतियोगिकत्वावच्छिन्नातात[illegible]भावस्यानुमित्यादि[illegible]प्रत्यक्षेपि[illegible]प्रसिद्धिः॥ जन्य
पदं चाक्षुषादावतिव्याप्तिवारणाय॥ ननूपादानप्रत्यक्ष[illegible]स्य[illegible]पाकुत्वाकादिनि
मात्रे हेतुना ळौळा

सोपादानमन्यक्षत्वमन्यधीजन्यमात्रवृत्तिमत्त्वादेस्तत्त्वस्य [illegible] जातिव्याप्तिरिति चेन्न॥ मर्यादो कृत्वा
ती भूयो ऽस्करेण घटादेश्छेदनात्तत्रापि घटत्वादेः सत्वाच्च [illegible] अन्यधीजन्यमात्रवृत्तित्वे व्याप्ति तीप्रतियोगि
भावात्॥ सामान्यग्राहीबष्पतिव्याप्तिसंभवाच्चेतिदिक्॥ ननु मानसत्वम नो ऽजन्यसाक्षात्कारत्वं तस्या
वाच्यो ऽश्रमन्त्वज्ञान ग्राह्यमानसत्वं चेति॥ जातिविशेष इति॥ आत्मादिसाक्षात्त्वावच्छिन्नं प्रति विजा
तीयात्ममनोयोगत्वेन हेतुत्वात्तज्जन्यतावच्छेदकतया मानसत्वजातिसिद्धिरिति भावः॥ घटत्वा
दीनां नित्यमनोयोगत्वेन हेतुत्वात्तज्जन्यतानवच्छेदकतया ... सचाभावत्वा
द्यनीकृति॥ तन्मते ऽनुगतधर्मो घटत्वादिरनन्यावृत्तिरूपः व्यावृत्तिश्चान्योन्याभावः सचाभावत्वा
नुष्ठेऽलीकोऽवकभूत इति यावत्॥ तथाचासद्विषयकत्वाद्विशिष्टसाक्षात्कारस्य भ्रमत्वमिति
भावः॥ अलीकत्वासिद्धेरिति॥ यद्यभावत्वाद्घटत्वादेरलीकत्वं तदा घटादेरपि स्वाभावाभाव
रूपत्वादलीकत्वापत्तिरिति भावः॥ ननु सविकल्पकनिर्विकल्पकयोर्मध्ये वैशिष्ट्यानवगाहीति॥
विशेषणविशेष्ययोः संबन्धो वैशिष्ट्यं तद्विषयिताशून्यज्ञानत्वमित्यर्थः॥ नरसिंहाकारज्ञानस्य विकल्प सम॰
कारेऽत्राति ऽव्याप्तिर्न वैशिष्ट्यविषयिताशून्यज्ञानत्वं निर्विकल्पकत्वमिति ध्येयं॥ ननु द्ववैशि १३
ष्ट्यं निर्विकल्पके ऽस्यान्मनोल्लक्षणान्तरमाह निराकारत्वेति॥ निः प्रकारकमित्यर्थः क्वचित्तथै
वपाठः वक्ष्यमाणसंसर्गविधया वैशिष्ट्यानवगाहिज्ञानं निर्विकल्पकं॥ इदं च वैशिष्ट्यमिविकल्प

अ

केनाव्याप्ति॥ तत्र वैशिष्ट्यस्य विशेष्यविधयैव भानेन संसर्गतया ऽभानात्॥ तथा च व्यवच्छिन्न विकल्पस्यार्थो वाकारः
॥ तच्च निर्विकल्पकं च॥ अनुमेयं॥ अनुमानगम्यं॥ प्रयोगश्च॥ अयं घट इति साक्षात्कार ऽजन्य घटत्वज्ञा जेर
नसाध्यः जन्यघटत्वविशिष्टज्ञानत्वात् जन्यसनुत्यविशिष्टज्ञानं तज्जन्यं तुज्ञानमध्यमिति सामान्यव्याप्तौ दंडी
त्यादि ज्ञानं दृष्टान्तः॥ अनुमाने ऽप्रयोजकत्वशंकानिरासाय कार्यकारणभावलक्षणमनुकूलतर्कमाह
जन्यत५ तथाहीत्यादिना॥ जन्येति विशिष्टज्ञानत्वावच्छिन्नं प्रति जन्यत्वविशेषणज्ञानत्वेन हेतुत्वमित्यर्थः॥ नित्यज्ञान
वारणाय कार्यतावच्छेदके जन्यत्वप्रवेशः॥ नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियमादित्यविशेषण
ज्ञानवतीश्वरे जन्यविशिष्टज्ञानवारणाय कारणतावच्छेदके पितृप्रवेशः॥ धारावाहिकस्थले द्वितीयादिज्ञा
ए६ नेष्वेवविशिष्टज्ञानस्यैव विशेषणज्ञानत्वेन जनकत्वसंभवान्न निर्विकल्पकसिद्धिरत आह प्राथमिकमिति
धारावाहिकज्ञानेषु प्राथमिकमित्यर्थः॥ नच जन्मान्तरीयेति॥ बवहितानीतघटत्वज्ञानमात्रेण लक्षण
मेतत्तु जन्मान्तरीयज्ञानस्यैवानुसरणे प्रयोजनविरहात्॥ अतएवाग्रेव्यवहित एवं वृत्तिविशेषणज्ञा
नस्य हेतुत्वमुक्तं॥ सामानाधिकरण्येति॥ एकस्य दंडज्ञाने ऽपरस्या दंडविशिष्टज्ञानवारणाय समवाये
नतद्विशिष्टज्ञानं प्रति समवायेन तद्विशेषणज्ञानं कारणमिति सामानाधिकरण्यप्रत्यासत्त्यातत्स्य हे
तुमित्यर्थः॥ तेन विनेति॥ विशेषणज्ञानेन विनापि संस्कारमात्रादि विशिष्टस्मरणोपपत्तेरित्यर्थः॥ नच

सं॰प्र॰ नुभवत्वजातौमानाभावेन स्मृतिभिन्नज्ञानत्वरूपस्यतस्यविशेषणज्ञानकार्यतावच्छेदकेनिवेशेगौरवा
२४ द्विशिष्टज्ञानत्वस्यैवकार्यतावच्छेदकीकृतस्मार्यमिकघटत्वादिविशिष्टज्ञानानिर्वाहापत्तेर्घटत्वादेर्निर्विक नि॰२
ल्पकानुभवस्यैवस्वीकर्तुमुचितत्वमित्यत आह किञ्चेति॥ चैत्रत्वादिविशिष्टेति॥ चैत्रत्वादेरिदानींत
नशरीरनिष्ठत्वेन तत्र सम्प्रत्यनुभवाभावेन स्मरणासंभवाच्चैत्रत्वादिनिर्विकल्पकानुभव एव तत्प्रकार
णं वाच्य इति भावः॥ ननुपदं प्रागननुभूतस्यैव चैत्रत्वादेरपुपदेशासहकृतेन्द्रियवेद्यतयोपदेशं विनेन्द्रिय
सन्निकर्षमात्रात्प्राथमिकविशिष्टप्रत्यक्षाभावोनुभवसिद्ध एव॥ तथा च तत्रापि उपदेशजन्यशाब्द
न्य॰ नुभवजसंस्कारस्य सत्त्वेन चैत्रत्वादिस्मरणेन निर्वाहसंभवान्निर्विकल्पकसिद्धिरत आह किंचेति॥ सा भ॰
क्षात्कारसामग्रीत॥ चक्षुरादिसंयोगतत्संयुक्तसमवायरूपचाक्षुषादिसामग्रीतः॥ ननु तत्र विशि
ष्टज्ञानं प्रति तत्र विशेषणज्ञानस्य हेतुत्वेपि विशिष्टज्ञानसामान्यं प्रति विशेषणज्ञानसामान्यस्य हेतु
तायां मानाभावान्न निर्विकल्पकसिद्धिरित्याशयेन शंकते नन्विति॥ विशेषणज्ञानस्य तज्ज्ञानसा राम॰
मान्यस्य॥ सर्वमेतत्॥ निर्विकल्पकसाधनं॥ एवं॥ ह्यतामवधेन॥ कृतमिति शेषः॥ ननु तद्धेतो १४
त॰२ रेवाग्रहकं किं तेनेत्याशयात्तु विशेषणज्ञानहेतुविशेषणेन्द्रियसन्निकर्षादिरेव विशिष्टज्ञानहेतुर
स्तु किं निर्विकल्पकाभ्युपगमेनेत्यत आह विस्तरस्त्विति॥ अयं भावः॥ सन्निकर्षस्याविशेषात्तु क

दा ख
सन्निकृष्टे न निःस्वरूपतो घटत्वप्रकारकं ज्ञानं कदाचिज्ज्ञानिमानिनि जातित्वेन घटत्वप्रकारकं ज्ञानमुत्पद्यते
इत्यस्योपपत्तये स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो घटत्वज्ञानस्य जातित्वेन घटत्वविशिष्टबुद्धिं प्रति च
स्वरूपतो घटत्वज्ञानस्य जातित्वेन घटत्वविशिष्टबुद्धिं प्रति च जातित्वेन घटत्वज्ञानस्य हेतुतया आवश्यक
त्वेन विशेषणज्ञानहेतुत्वसिद्धिरिति॥ वैशिष्ट्यावगाहीति॥ वैशिष्ट्यविषयताशालिप्रत्यक्षमित्यर्थः॥ तेना
नुमित्यादौ नातिव्याप्तिः॥ ननु विशेष्यविशिष्टनिर्विकल्पके ऽतिव्याप्तिरत आह सप्रकारकं वेति॥ वस्तुत
स्तु संसर्गविषयावैशिष्ट्यविषयकप्रत्यक्षं सविकल्पकमित्यर्थः विशिष्ट्यनिर्विकल्पके च न संसर्गविष
यावैशिष्ट्यविषयकत्वमिति नातिव्याप्तिः॥ तथा च व्यवच्छिन्नविकल्पार्थे एवकारः इत्येव सारमिति भा
वः॥ विषयताविशेष इति॥ विशेष्यतासंसर्गताख्याविषयताभिन्नविषयतेत्यर्थः॥ विषयाकारेति॥ घटो
ज्ञानविषयस्तत्त्वमनुभवमतीतिसिद्ध इत्यर्थः॥ ननु विषयता ज्ञानस्वरूपाविषयस्वरूपा वा॥ नाद्यः॥ घटपटे
त्यादिसमूहालंबनस्य भ्रमत्वापत्तेः॥ ज्ञानस्वरूपविषयता विशेषात्मकविशेष्यतायाएकत्वेन घटत्वा
तत्र३ भाववत्स्वविशिष्टविशेष्यताकत्वसंबंधेन सत्त्वात्॥ प्रकारतावच्छिन्नविशेष्यताकज्ञानस्यैव भ्रमत्वात्
एवं पटत्वमादायापि भ्रमत्वापत्तेः॥ न द्वितीयः॥ दंडपुरुषसंयोग॥ दंडीपुरुष इति ज्ञाने यो वैलक्ष
ण्यानापत्तेः॥ उभयज्ञानविषयेकत्वेन तत्स्वरूपविषयताया अभेदादित आह पदार्थान्तरमिति॥ अ

निरिक्ता विषयता च विशेष्यभेदेन भिन्ना भिन्नेति न पूर्वोक्तदोषावकाश इति भाव ॥ एकदेशिनां मत
स्वरसनीतं गुज्ञातिरिक्तपदार्थस्वीकारे ऽपसिद्धान्त इति ॥ वस्तुत इति [illegible] विषयता विषयस्वरूपैव
परं तु विशेष्यभेदेन [illegible] भिन्ना भिन्नेति न कोपि विशेष इति ॥ विषयतायास्स्वरूपसंबन्धात्मिकेति स्वाभिमतं
[illegible]पन्नं भूतमनं रूपयितुमुपन्यस्यति भवत्विति ॥ अन्यथा ज्ञाततानुजन्यविषयनिष्ठज्ञाततानुभूत्पन्नम
[illegible] इत्यर्थः ॥ क्रियेति [illegible]र्थ इत्यर्थः ॥ विचेष्टयतीति । न
ज्ञानकर्मत्वमिति ॥ घटं जानातीत्यादौ ज्ञानकर्मत्वमित्यर्थः ॥ क्रियेति [illegible] ॥ विनष्ट इति ज्ञाततायाः असत्वेपिता
याच घटो ज्ञात इति प्रतीतिबलाज्ज्ञाततापदार्थान्तरसिद्धिः ॥ विनष्टश्चेज्ज्ञाततायाः अस्त्वेपिता
दृष्टप्रतीतेः सत्वादिति भावः ॥ विनष्टे ज्ञाततायाः असत्वमुपपादयति नहीति ॥ तत्र विनष्टघटे प्रती
तेः ॥ घटो ज्ञात इति प्रतीतेः ॥ अन्यत्रापि ॥ विद्यमानघटादावपि ॥ स एव ॥ स्वरूपसंबन्धविशेष एव ॥
असत्व ॥ तादृशप्रतीतिविषयोस्तु ॥ ननु ज्ञाततायाः अस्वीकारे घटं जानातीत्यादौ घटे क्रियाजन्यफल
शालित्वाभावात्कर्मविभक्तिर्न स्यादत आह कर्मविभक्तेरपीति ॥ नन्वेवेति ॥ विनष्टस्थल एवेदेवेत्यर्थः
तत्र स्वरूपसंबन्धरूपविषयत्वे कर्मविभक्त्यर्थे क्षणावविद्यमानस्थलेपि लक्षणेन ॥ तथा च घटं जा
नातीत्यादौ घटविषयकज्ञानवानित्यन्वयबोधो न तु घटकर्मकज्ञानवानिति भावः ॥ प्रकारत्वं न वि
षयताविशेषः किंतु विशेष्यनिष्ठभासमानासंबन्धप्रतियोगित्वमेव तदिति सगीकर्तुणामन्तमाहान्येति

क्षितेति ॥ प्रत्यक्षप्रमाणस्य लक्षणमुक्त्वा स्वरूपमाह तच्चेन्द्रियात्मकमिति ॥ सर्वविषयकत्वेति ॥ मनः सर्वविष
यकज्ञानजनकमिति सिद्धान्तभंगादित्यर्थः ॥ परतन्त्रमिति ॥ चक्षुरादिसापेक्षमित्यर्थः ॥ तथा च नान्धस्य विष
कृष्णघटादीनां मनसा ग्रह इति भावः ॥ ननु परतन्त्रत्वमिति स्वतन्त्रं किंतत्तरमत आह परमिति ॥ चक्षुषा सुरभिचं
दनमित्यादिज्ञानं सौरभांशेन प्रत्यक्षं किंतु स्मरणात्मकं ॥ एकस्यैव ज्ञानस्यांशभेदेनानुभवस्मरणात्मकत्वे
बाधकाभावात् ॥ न च स्मृतित्वानुभवत्वयोः संकर इति वाच्यं ॥ गुणगतजातेरनभ्युपगमात् ॥ जातेर्निय
तसंख्यानवच्छेदकत्वात् [illegible] संकरस्य निबाधकत्वं ॥ गुणगतजातौ गुणे च संख्यानासंभवादतो ज्ञानोद्भवलौकिक
प्रत्यासत्तेरनभ्युपगम एव ॥ तथा च मनसो बहिर्विषयकज्ञानजनने चक्षुरादिकमेव सहकारीति मीमां
सकमतं निराकुर्वन्नाह न पुनश्चक्षुरादिमात्रमिति ॥ मात्रपदेन ज्ञानसामान्ययोगजधर्मप्रत्यासत्तीनां
व्यवच्छेदः ॥ ज्ञानस्य प्रत्यासत्तित्वोपपादकमाह स्मृतपदार्थानामिति ॥ अन्यथा स्मृतपदार्थानां मनसा संस
र्गग्रहे ॥ कवीति पदार्थसंसर्गज्ञानं विना काव्यरचनाया असंभवात् ॥ वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वा
दिति भावः ॥ योगजधर्मस्य प्रत्यासत्तित्वोपपादकमाह ॥ योगिनामिति ॥ सामान्यस्य प्रत्यासत्तित्वोपपादक
माह मेयत्वेति ॥ ननु सामान्यादिप्रत्यासत्तिसहकृतस्य मनसो बहिर्विषयकप्रमाजनकत्वे सामान्यादेः प्र
माणान्तरतापत्तिः ॥ मनो यदसाधारणं सहकार्यासाद्य बहिर्गोचरां प्रमां जनयति तस्य प्रमाणान्तरत्वं यथा
त्रितेः

मं॰ प्र॰ चक्षुरादेरिति सामान्यव्याप्तेरिति चेन्न॥ सामान्यादेः संयोगसाधारणप्रत्यासत्तित्वेन मनः सहकारित्वेपि असा
धारणसहकारित्वाभावात्॥ केचित्तु चक्षुरादिवत् त्वगिन्द्रियस्यासाधारणसहकारित्वेपि व्यापारत्वाभावेन प्रमा
२८ याकरणत्वाभावात् न प्रमाणत्वमित्याहुः॥ सविकल्पकज्ञानेति॥ निर्विकल्पकज्ञानस्यातीन्द्रियत्वात् बहिर्भा
वाय सविकल्पकेति ज्ञानविशेषणं॥ सविकल्पकत्वमत्र वैशिष्ट्यावगाहित्वमात्रं न तु मनस्त्वं सत्वघटितं॥ तेना
नुमित्यादेः संग्रहः॥ शंकते॥ नन्विति॥ इच्छा आत्मनः स्वतंत्रमनोग्राह्यत्वे॥ महदुद्भूतरूपवदिति॥ अत्र महदि उद्भू॰
त्य समस्तं॥ अन्यथा कर्मधारयाश्रयणे महदुद्भूतरूपवदित्तिस्यादिति भावः॥ उद्भूतत्वमिति॥ घ्राणादिनिष्ठरूप
दोषबहिर्द्रव्यप्रत्यक्षजनकतावच्छेदकतया सिद्धो जातिविशेष उद्भूतत्वमित्यर्थः॥ ननु नीलत्वादिना संकरादु
द्भूतत्वं न जातिरिति चेन्न॥ नीलत्वादिव्याप्यनानैवोद्भूतत्वमित्यंगीकारात्॥ नचैवमुद्भूतरूपत्वेन बहिर्द्रव्य
प्रत्यक्षं प्रति निष्प्रत्यूहं कार्यकारणभावः प्रतिबन्धहेतुत्वं न स्यात्॥ कारणतावच्छेदकोद्भूतत्वस्याननुगमेन कारणाननु
गमादिति वाच्यं॥ अन्यथानुपपत्त्या तत्तदुद्भूतनीलपीताद्यन्यतमत्वेन तत्वे तत्तादिति भावः॥ अनुद्भूतत्व राम॰
जातीति॥ घ्राणादिनिष्ठरूपादौ प्रत्यक्षप्रतिबंधकतावच्छेदकतया सिद्धो जातिविशेषोनुद्भूतत्वं तदभाव १८
उद्भूतत्वमित्यर्थः॥ नचात्रापि नीलत्वादिना संकर इति वाच्यं नीलत्वादिव्याप्यनानैवानुद्भूतत्वमित्यभ्यु
पगमात्॥ नन्वनुद्भूतत्वाभावकूटविशिष्टरूपत्वेन बहिर्द्रव्यप्रत्यक्षं प्रति निष्प्रत्यूहं कार्यकारणभावः प्रतिबन्धहेतुत्वमिति

मेक॰
नाननुगमः॥ यद्वा मधुरत्वव्याप्यमेवानुद्भूतत्वं रसनादाविव घ्राणादावपि मधुरानुद्भूतस्यैव सत्वे बाधकाभावा
त्॥ एवं चैकविधानुद्भूतत्वाभावविशिष्टरूपत्वेनैव हेतुत्वं एतेन सर्वकल्पे एकविशिष्टापरत्वरूपकूटत्वस्य विशे
षणविशेष्यभावे विनिगमकाभावेनाननुगतस्य हेतुतावच्छेदकघटकतया तस्याननुगमेपि न क्षतिः॥ एवं र
सेपि मधुरत्वव्याप्यमेकमेवानुद्भूतत्वं॥ रसनादाविव घ्राणादावपि मधुरानुद्भूतस्यैव सत्वे॥ बाधकाभावादिति भा
वः॥ नन्वनुद्भूतत्वं जातिविशेष इत्येके॥ अनुद्भूतत्वजात्यभाव इत्यपरे इति मूलोक्तविप्रतिपत्तौ कः सिद्धान्त इति चे
२८ त्॥ मतभेदेनोभयस्यापि सिद्धान्तत्वमिति ऋजवः॥ मणिकारानुयायिनस्तु रूपरसादिचतुष्टये उत्कृष्टे प्रत्य
क्षे प्रवृत्तिनिमित्तं जातिरेवोद्भूतत्वं नच नीलत्व मधुरत्व सुरभित्व शीतत्वादिना संकर इति वाच्यं नीलत्वादिव्या
प्यनानैवोद्भूतत्वमित्यभ्युपगमात्॥ किंचोद्भूतपदनानार्थप्रवृत्तिनिमित्तस्योद्भूतत्वस्य नानात्वात्॥ भत
नचैवमुद्भूतरूपत्वादिना बहिर्द्रव्यप्रत्यक्षे हेतुत्वं न स्यादिति वाच्यं॥ उद्भूतपदप्रवृत्तिनिमित्तजातित्वेनानुगमी
कृतस्योद्भूतत्वस्य बहिर्द्रव्यप्रत्यक्षहेतुतावच्छेदकत्वात्॥ नचानुद्भूतत्वजात्यभाव एवोद्भूतत्वं तद्विशिष्टरू
पत्वमेव तद्धेतुतावच्छेदकं॥ गौरवात्॥ तच्चोद्भूतत्वं घ्राणादिनिष्ठरूपादौ॥ मानाभावात्॥ परमाणुद्व्यणु
करूपादौ चास्त्येव॥ महत्त्वरूपकारणान्तरविरहात् द्व्यणुकादेः प्रत्यक्षत्वं॥ अन्यथा त्र्यणुकादावनुद्भूतरू
पं न स्यात्॥ अनुद्भूतेनोद्भूतानारम्भात्॥ अतितप्ततैलादौ तदंतर्वर्तिन्युद्भूतरूपवत्सूक्ष्मावयवे

न०प्र रेवोद्भूतरूपवत्तोमहत्त्ववत्त्वेऽपरंभाभ्युपगमात्॥ नचप्रत्यक्षेप्रयोजकमुद्भूतत्वं॥ त्वाष्टज्ञानादावपिकिंन
७ स्यात्॥ तस्यज्ञाष्टत्वसविकल्पकज्ञानत्वादिनैवयोग्यत्वात्॥ नचरूपादावपिरूपत्वादिनैवप्रत्यक्षयोग्य
त्वं॰ घ्राणगृह्यादेरपिप्रत्यक्षापातात्॥ द्रव्यगुणादीनांचसाक्षात्परंपरयोद्भूतरूपसंबंधादेवप्रत्यक्षत्वो
पपत्तेर्नतत्रोद्भूतत्वकल्पनं॥ नचद्रव्यएवतत्कल्पनामुद्भूतद्रव्यसंबंधादेवचगुणादीनांप्रत्यक्षत्वमिति
वाच्यं॥ तर्हिवायुस्पर्शादेःप्रत्यक्षंनस्यात्॥ वायोरतींद्रियतयातत्संबंधोद्भूतसंबंधाभावात्॥ न
स्यादुपादिचतुष्टयवृत्त्येवोद्भूतत्वमित्याहुः॥ नव्यास्तुघटपटादिवद्बहिर्द्रव्यवृत्तिसैकत्वनिष्ठमेवोद्भूतत्वंन योग्य
तुरूपसादिनिष्ठं॥ नीलत्वादिनासंकरभियात्नानात्वकल्पनायागौरवात्॥ उद्भूतैकत्वमेवसाक्षात्
रपरयावा ~~[illegible]~~ बहिर्द्रव्य[illegible]णादीनांप्रत्यक्षेकारणमित्याहुस्तन्न॥ घटादिपरिमा
णादिकमादायविनिगमनाविरहात्॥ वायुस्पर्शादेःप्रत्यक्षानुपपत्तेश्च॥ वायोरतींद्रियतयातत्रोद्भूतैक राम० २७
त्वाभावादित्यल्पं॰ विनेन॥ प्रसंगाच्चक्षुर्योग्यगुणानाह योग्या गुणाइति॥ त्वगिंद्रिययोग्यद्रव्यमा
हत्वंचइति॥ तेनमहत्त्वसमानाधिकरणोद्भूतरूपस्पर्शवद्द्रव्यस्यत्वगिंद्रिययोग्यत्वेन॥ प्रसंगात्त्वगिं
गुणानाह द्रिययोग्यगुणाश्चेति॥ महदुद्भूतस्पर्शाश्चेति॥ अत्रमहतः उद्भूतस्पर्शाइतिषष्ठीतत्पुरुषःतेनमहत्त्व
समानाधिकरणोद्भूतस्पर्शोऽइत्यर्थः॥ द्रव्यनिष्ठत्वगिंद्रिययोग्यतावच्छेदकमहत्त्वसमानाधिकरणोद्भू

२य
तरूपस्पर्शवत्त्वमुक्तंतत्रोद्भूतरूपंननिवेश्यमितिपूर्वपक्षाभिप्रायेणमीमांसकमतंदर्शयतिमीमांसकास्त्वि
ति॥ एतेनमीमांसकमतेस्वयंदोषानभिधानादेतत्तस्याभिमतमितिभ्रमःपरास्तः॥ अत्रेदंसिद्धांतर
हस्यं॥ संग्राहकलाघवेनबहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नंप्रतिउद्भूतरूपस्यहेतुत्वात्नवायोःस्पार्शनत्वं॥ नच
विनिगमकाभावादुद्भूतस्पर्शस्यैवतत्त्वावच्छिन्नंप्रतिहेतुत्वमितिवाच्यं॥ प्रभायाअहेतुकत्वापत्तेः॥ न
चेष्टापत्तिः॥ प्रभारूपस्यैवचक्षुषाग्रहादितिवाच्यं॥ रूपवतीतिद्रव्यानीतिप्रतीतेःप्रभामंडलरूपद्रव्यविष
यिण्याःसर्वानुभवसिद्धायाअपलापापत्तेः॥ तस्मात्श्रोत्रेणाकारागततद्वाच्छब्दवत्त्वचापिवायुगतस्पर्शएव
गृह्यतेनेनचस्पर्शेनवायुरनुमीयतेइतिदिक्॥ स्वयंपूर्वंनचतत्रोक्तंसमवायप्रत्यक्षत्वंवैशेषिकाभिमतस
मवायातींद्रियत्वदूषणेनविनानोपपद्यतेअतस्तन्मतंदूषयितुमुपन्यस्यतिवैशेषिकास्त्विति। तन्मतेचक्षुःनें
द्रियजन्यलौकिकसाक्षात्कारविषयः॥ तेनसमवायस्योपनीतप्रत्यक्षविषयत्वेपिनक्षतिः॥ कथमन्य
थेतिसंबंधप्रत्यक्षेयावदाश्रयप्रत्यक्षस्याहेतुत्वेइत्यर्थः॥ तथाहेतुतायां। संबंधप्रत्यक्षेयावदाश्रय
प्रत्यक्षत्वेनहेतुतायां॥ ननुभूताकाशसंयोगस्यायोग्यमात्रसमवेतगुणत्वाभावेनाप्रत्यक्षत्वेपिघटपटो
भयसंयोगस्यघटमात्रप्रत्यक्षेसतिप्रत्यक्षापत्तिः॥ योग्यमात्रसमवेतगुणत्वस्यतत्रसत्वात्॥ तथाचसं
बंधप्रत्यक्षेयावदाश्रयप्रत्यक्षस्यहेतुत्वंवक्तव्यमेवेत्यस्वरसादाहकिंचेति॥ द्रव्यग्राहकचक्षुरादी

लि

प्र.प्र. नांविषययोग्यतांदर्शयित्वाऽव्याप्यग्राहकघ्राणादीनांविषययोग्यतांक्रमेणदर्शयतिघ्राणयोग्यइत्यादि
१८ ना॥ ननुचक्षुरादीनांगन्धादिग्राहकत्वेनिमीलितनयनादेरपिघटादिप्रत्यक्षापत्तिरतआहतत्स्पृष्टें
न्द्रियस्येति॥ सन्निकर्षःसहकारीइति॥ प्रत्यक्षजननीयइतिशेषः॥ तथाचनिमीलितनयनादेःसन्नि
कर्षाभावान्नघटादिप्रत्यक्षमितिभावः॥ एतेनेन्द्रियात्मकप्रत्यक्षनिरूपणानंतरंसन्निकर्षनिरूपणेइन्द्रि
यतत्सन्निकर्षयोरेककार्यकारित्वंसंगतिर्दर्शिता॥ अन्यथाऽसंगताभिधानेऽन्यत्रप्रसंगापत्तेरिति॥ ता लापला५
न्सन्निकर्षान्षोढाविभजतेतेचेतिसंयोगादिसन्निकर्षाणांमिलितानांनेन्द्रियसहकारित्वंकुत्राप्यर्थेमि
लितानांतेषामसत्वात्॥ किंतुप्रत्येकंतत्सहकारित्वमित्यभिप्रेत्यपृच्छतिअथकेनेति॥ उक्तरीत्येन्द्रिय
संयोगेनेत्यादिनातत्रसमवायेअभावेच॥ संयोगसमवाययोरभावादिति॥ पंचविधसन्निकर्षस्यसंयोग
समवायघटितत्वात्तयोश्चतत्राभावात्पंचविधेनतेनैतदुभयत्रहेतितदर्थंविशेषणताप्रत्यासत्तिरा ६५ राम
वश्यकीतिभावः॥ तत्रेन्द्रियसन्निकृष्टविशेषणताइन्द्रियसंयुक्तविशेषणतैवतथाचघटादेरसत्वा १८
भावप्रत्यक्षंनस्यादतआहइन्द्रियसन्निकृष्टेति॥ इन्द्रियसन्निकृष्टेत्यत्रविशेषणीभूतेन्द्रियसन्निकर्षस्य
संयोगादेर्बहुविधत्वादिन्द्रियसन्निकृष्टविशेषणताबहुविधेत्यर्थः॥ तच्चबहुविधत्वंइन्द्रियसंयुक्तविशेषण धा२
ता॥ इन्द्रियसंयुक्तसमवेतविशेषणता॥ इन्द्रियसमवेतसमवेतविशेषणता॥ समवेतविशेषणता॥ समवेतसम-